Gyanshauryam, International Scientific Refereed Research Journal
© 2021 GISRRJ | Volume 4 | Issue 1 | ISSN : 2582-0095

# भारतीयप्राचीनशिक्षणव्यवस्था



डा.इक्कुर्ति वेङ्कटेश्वर्लु

सहायकाचार्य:, शिक्षाशास्त्रविभाग:

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालय:

नवदेहली।

**Article Info**
Volume 4 Issue 1
Page Number: 80-87
**Publication Issue :**
January-February-2021
**Article History**
Accepted : 02 Feb 2021
Published :15 Feb 2021

**सारांशः** – इत्येवं भारतीयसंस्कृतवाङ्मये शिक्षणव्यवस्था उल्लिखिता वर्तते। न केवलं शिक्षणव्यवस्थाया: विषये अपि च गुरुः, शिष्य:, शिक्षणपद्धति:, शिक्षा इत्यादि विषयेषु तत्तत् सन्दर्भेषु तत्वानि प्रोक्तानि सन्ति।

**मुख्यशब्दः** – भारतीय, प्राचीन, शिक्षणः, व्यवस्था, गुरुः, शिष्य:, शिक्षणपद्धति:, मुनयः।

---

**भारतीयसांस्कृतिकेतिहासः-** विश्वान्तराले बहूनि राष्ट्राणि विलसन्ति। एषु अन्यतमं भवति भारतम् । भारतराष्ट्रमतीव- प्राचीनतमं राष्ट्रमस्ति। अत एव आर्षभारतम्, पुण्यभूमिः, धर्मभूमिः, प्राचीनभारतम् इत्यभिधीयते। प्रत्येकं राष्ट्रस्यापि प्रगतिः तद्राष्ट्रस्य भौगोलिक-सांस्कृतिकेतिहासमाधृत्य तिष्ठति। प्राचीनभारतीयसांस्कृतिकेतिहासस्य अध्ययनात् प्राक् भौगोलिकेतिहासस्य अध्ययनं करणीयम् ।

**भारतीयभौगोलिकेतिहासः -** प्राचीनभारतास्य आर्यावर्तः इति सुप्रसिद्धं नाम आसीत् । मुनयः अस्य देशस्य नाम आर्यावर्तः इति उल्लिखितवन्तः। भारतस्य भौगोलिकविषये एवमवोचत् –

**आसमुद्रात्तु वै पूर्वादासमुद्रात्तु पश्चिमात् ।**

**तयोरेवान्तरं गिर्योरार्यावर्तं विदुर्बुधाः।।** (मनुस्मृतिः २.२२)

**उत्तरं यत्समुद्रस्य हिमाद्रेश्चैव दक्षिणम् ।**

**वर्षं तद् भारतं नाम भारती यत्र सन्ततिः।।** (विष्णुपुराणम् २.३१)

**अस्त्युत्तरस्यां दिशि देवतात्मा हिमालयो नाम नगाधिराजः ।**

**पूर्वापरौ तोयनिधी वगाह्य स्थितः पृथिव्या इव मानदण्डः ।।** कुमारसम्भवः,१.१

**Copyright :** © the author(s), publisher and licensee Technoscience Academy. This is an open-access article distributed under the terms of the Creative Commons Attribution Non-Commercial License, which permits unrestricted non-commercial use, distribution, and reproduction in any medium, provided the original work is properly cited

इति पूर्व-पश्चिम-दक्षिणोत्तरभागे स्थितानां पर्वतानां समुद्राणां चिह्ननि सुस्पष्टमुल्लिखितानि। एतादृश- सुन्दरभौगोलिकदेशे अतीवाचरणीया संस्कृतिरपि आसीत्।

**वेदोऽखिलो धर्ममूलम्।** मनुस्मृति .२.६

**सर्वज्ञानमयो हि सः।** मनुस्मृतिः २.७

**सङ्गच्छध्वं संवदध्वं सं वो मनासिं जानताम् ।**

**देवा भागं यथा पूर्वे संजानाना उपासते ।।** ऋग्वेदः १०.१९१.२

**त्वां विशो वृणुतां राज्यात।** अथर्ववेदः -३.४.२

**विशस्त्वा सर्वा वाञ्छन्तु।** अथर्ववेदः ४.८.४

**विशि राजा प्रतिष्ठितः।** यजुर्वेदः २०.९

**श्रूयतां धर्मसर्वस्वं श्रुत्वा चाऽप्यवधार्यताम् ।**

**आत्मनः प्रतिकूलानि परेषां न समाचरेत् ।।** महाभारतम् ।

एवं सांस्कृतिक-राजनैतिक-सामाजिक-शैक्षिकविषयाः बहुधा बहुत्र उल्लिखिताः

**भारतीयप्राचीनसंस्कृतवाङ्मयम् : -** भारतीयप्राचीनसंस्कृतवाङ्मयविषये सामान्यमानवः वक्तुं न पारयति न शक्नोति च । संस्कृतवाङ्मयम् अपारम् अनन्तम् अगाधं गभीरं च विद्यते । वेदोऽखिलो धर्ममूलम् इति मनुस्मृतौ उक्तेन कथनेन भारतीयवाङ्मयस्य आद्यं तु वेदः एव। वेदादारभ्य काव्यपर्यन्तं संस्कृतवाङ्मयं विराजते। तदत्र विचार्यते ।

**वेदाः** - १. ऋग्वेदः २. यजुर्वेदः ३. सामवेदः ४. अथर्ववेदः ।

उपवेदाः - १. आयुर्वेदः (चरक- सुश्रुत - काश्यपः - अष्टाङ्गहृदयादयः) २. धनुर्वेदः, ३. गान्धर्ववेदः , ४. अर्थवेदः ।

**वेदाङ्गानि -** १. शिक्षा , २. व्याकरणम् , ३. निरुक्तम् ४. छन्द : ५. ज्योतिषम् ६. कल्पम्।

**वेदोपाङ्गानि** - १. वैशेषिकः २. न्यायः ३. सांख्यः ४. योगः ५. पूर्वमीमांसा ६. उत्तरमीमांसा

**ब्रह्मणानि** - शतपथ, ताण्ड्य, तैत्तिरीयादीनि ।

**आरण्यकानि** - बृहदारण्यकम् , ऐतरेयारण्यकं, तैत्तिरीयारण्यकम् इत्यादीनि ।

**उपनिषदः** - ईशकेनकठमुण्डकमाण्डूक्यछान्दोग्यादयः ।

**वेदान्ताः -** अद्वैत - विशिष्टाद्वैत-द्वैत-द्वैताद्वैतादिवेदान्ताः ।

**धर्मग्रन्थाः** - मनु - पाराशर - याज्ञवल्क्यादिधर्मशास्त्राणि ।

**गृह्यसूत्राणि** - आपस्तम्ब-गौतमादि ऋषिप्रणीतानि ।

**पुराणानि** - अष्टादशपुराणानि, भागवत - गरुड - ब्रह्म - ब्रह्माण्डादीनि एवम् उपपुराणानि च ।

**इतिहासादयः** - रामायणभारतादयः।

**काव्यानि** - कालिदास - माघ - भास - बाणादीनां काव्यानि ।

एवमनन्तमपारं भारतीयसंस्कृतवाङ्गयम् इदं सर्वेभ्यः ज्ञानभिक्षाम् अददात् । अस्मिन् वाङ्मये ज्ञान - विज्ञान - दार्शनिक - धार्मिक - सामाजकि - सांधिक- राजकीय - नैतिक-शैक्षिकादिविषयाः तत्र तत्र यथोचितम् उल्लिखिताः विलसन्ति च।

**संस्कृतवाङ्मये ज्ञानसाधकतत्त्वानि: -** भारतस्य प्रतिष्ठे द्वे संस्कृतं संस्कृतिस्तथा इति आर्षवाक्येन ज्ञायते भारतस्य कीर्तिः संस्कृतवाङ्मयेन संवर्धितेति। अत्र न केवलं शास्त्रविषयाः चर्चिताः अपि तु बहुत्र तेषां शास्त्राणां प्रतिपादनसन्दर्भे संक्रमणसमये च ज्ञानस्य सङ्क्रमणपद्धतिमपि चिन्तितवन्तः प्रतिपादितवन्तश्च। संस्कृतवाङ्मयं गभीरमस्ति तत् शास्त्रप्रतिपादनावसरे अर्थात् अध्ययनाध्यापनावसरे कतिचनज्ञान- साधकतत्त्वान्यपि सविवरं प्रत्यपादयत्। व्याकरणाध्यापनसमये यथा सूत्रपद्धतिः तर्कपाठनसन्दर्भे यथा तर्क -वितर्क - वादोपवादपद्धतिः, प्रश्नोपनिषदः पाठनावसरे यथा प्रश्नोत्तरविधिः तथैव प्रत्येकमपि शास्त्रपाठनावसरे पठनावसरे च बहूनि ज्ञानसाधकतत्त्वानि प्रतिपादितानि राजन्ते।

उदाहरणार्थम् - अर्थशास्त्रे कौटिल्येन विद्याप्राप्तये अष्टौ ज्ञानसाधकतत्त्वानि प्रोक्तानि, तानि यथा - शुश्रूषा - श्रवण- ग्रहण - धारण - विज्ञान - ऊह- अपोह- तत्त्वाभिनिविष्टबुद्धिं विद्या विनयति नेतरम् । (अर्थशास्त्रं,२ प्र-वृद्धसंयोगः)

अधिगमप्रणालीदृष्ट्या छात्रं यानि तत्त्वानि अधिगमे प्रभावयन्ति तानि सर्वाण्यपि ज्ञानसाधक- तत्त्वानि अधिगमप्रणाल्यामन्तर्भवन्ति इत्यर्थः। संस्कृतवाङ्मये वा शास्त्रे वा उक्तं प्रत्येकमपि ज्ञान- साधकतत्त्वमेकैकमपि अधिगमतत्त्वं भवति । एवमनेकानि तत्त्वानि अधिगमं प्रभावयन्ति तानि सर्वाण्यपि अधिगमप्रणाली इत्युच्यन्ते। तादृशाधिगमप्रणाली प्राचीनादेव वर्तते इति किञ्चित् विसंवादः तदत्र प्रतिपाद्यते।

**संस्काराः** – भारतीयजीवनविधाने संस्काराणां प्राधान्यं वर्तते। जीवने सर्वाङ्गीणविकासार्थं संस्काराः क्रियन्ते। यदि व्यक्तेः संस्कारः न क्रियते तर्हि व्यक्तिः संस्कारवान् न भवति । संस्कारस्या- भिप्रायः शुद्धिः धार्मिकक्रियायां तथा व्यक्तेः दैहक-मानसिक - बौद्धिक - परिष्काराणामनुष्ठानम्, अनेन व्यक्तिः समाजे पूर्णविकसितसदस्यरूपेण परिचितो भवति । किन्तु हैन्दवसंस्कारे बहूनि प्रारम्भिकविचार- धार्मिकविधिविधानसहायकनियमानुष्ठानानि च समाविष्टानि । अस्योद्देश्यं केवल- मौपचारिकदैहिकसंस्कारेषु सीमितं न भवति। प्रत्युत व्यक्तेः सम्पूर्णव्यक्तित्वस्य पूर्णत्वसम्पादनम्। वस्तुतः सर्वविधसंस्कारेषु संस्कृतव्यक्तेः विलक्षणीयता तथा अवर्णनीयता परिलक्षिता भवति।

संस्कारस्यानुष्ठानं वैदिककालात् पूर्वमभवत् यत्र कर्मकाण्डस्य प्रयोगोऽभवत् । शतपथब्रह्मणे - स इदं देवेभ्यो हविः संस्कुरु साधु संस्कृतं संस्कुर्वित्येवैतदाह इति । पुनः तस्मादुस्त्री पुंमासं संस्कृते तिष्ठन्तमभ्येति इति वर्णितम् । छान्दोग्योपनिषदि तस्मादेव एवं यज्ञस्य मनश्च वाक्

च वर्तिनी। न्यतरां मनसा संस्करोति ब्रह्म वाचा होता इति दृश्यते। एतेन ज्ञायते यत् संस्काराः व्याक्तिं व्यक्तित्ववन्तं कुर्वन्ति इति। एवञ्च मानवः यदि जन्मना शूद्रोऽपि संस्कारेण द्विजः भवति।

जन्मात् प्राक्संस्काराः - १. गर्भाधानम् २. पुंसवनम् ३. सीमन्तोन्नयनम्। शैशवावस्थायां संस्काराः - ४. जातकर्म ५. नामकरणम् ६. निष्क्रमणम् ७.चूडाकर्म ८.अन्नप्राशनम् ९. कर्णवेधः। विद्याध्ययनसंस्काराः - १०. उपनयनसंस्कारः ११. वेदारम्भसंस्कारः १२. समावर्तनसंस्कारः। गृहस्थाश्रमसंस्काराः - १३. विवाहसंस्कारः १४. वानप्रस्थसंस्कारः १५. संन्याससंस्कारः। मरणानन्तरसंस्कारः - १६. अन्त्येष्टिः।

**संस्कारस्य उद्देश्यानि**

१. अवाञ्छितप्रभावस्य निराकरणम्।

२. अभीष्टप्रभावाणामामन्त्रणम्।

३. धन-धान्य-पशु-सन्तान-दीर्घायु-समृद्धि-शक्ति-बुद्धीनां प्राप्तिः।

४. जीवनदशायां बहूनां हर्षानन्दविषयादभावानामभिव्यक्तीकरणम्।

५. सामाजिकविशेषाधिकारेषु दायित्वप्राप्तिः। यथा - उपनयनात् परं वेदाध्ययने धार्मिक-क्रियासु च अधिकारः।

६. गर्भबीजसम्बन्धिदोषाणां दूरीकरणम्।

७. स्वर्गमोक्षयोश्च प्राप्तिः। शङ्खलिखितौ कथयतः - संस्कृतः अष्टावात्मगुणैः युक्तः पुरुषः ब्रह्मलोकं प्राप्नोति। यथा -

संस्कारैः संस्कृतः पूर्वैरुत्तरैरनुसंस्कृतः।
नित्यमष्टगुणैर्युक्तो ब्रह्मणो ब्रह्मलौकिकः।
ब्रह्म्यं पदमवाप्नोति यस्मान्नच्यवते पुनः॥

८. व्यक्तेः नैतिकविकासः।

९. व्यक्तित्वस्य निर्माणं विकासश्च। चित्रक्रमेऽपि संस्कारस्य आवश्यकतां प्रतिपाद्य अङ्गिराः कथयति -चित्रकर्म यथाऽनेकैरङ्गैरुन्मील्यते शनैः।
ब्रह्मण्यमपि तद्वत् स्यात् संस्कारैर्विधिपूर्वकम्॥

१०. योऽनुभवार्थं सम्पूर्णदैहिकक्रियायामाध्यात्मिकध्येयं सूचयति।

११. व्यक्तेरन्तःकरणे सामाजिकदायित्वप्रबोधनम्।

१२. अध्ययने प्रभावपूर्णाधिगमसाधनाय इति।

**आश्रमव्यवस्था**– आचारवान् आश्रमधर्मी इति कथ्यते। धर्मः कोऽपि वा भवतु तस्य मूलं श्रुतिः एव। एवं वर्णव्यवस्था - आश्रमव्यवस्था च ततः एव प्रारब्धा। वर्णव्यवस्थायाः आश्रमव्यवस्थायाः मिथः सम्बन्धः वर्तते। मानवानां जीवने चतस्रः अवस्थाः विद्यन्ते। ऋषयः ताः एवमवोचन् - ब्रह्मचर्यं, गार्हस्थ्यम्, वानप्रस्थ्यम्, संन्यासी च। आश्रमस्य शूद्रस्यार्थः धार्मिककार्यकरणम् अथवा पवित्रकार्यकरणमिति। तदेव वेदोपनिषदादिग्रन्थेषु आश्रमव्यवस्थायाः विषये विस्तृतवर्णनं दृश्यते। आश्रमाः चत्वारः - ब्रह्मचर्यं, गृहस्थः, वानप्रस्थः, परिव्रजकश्च। ब्रह्मचर्यं समाप्य गृहस्थः भवेत्। गृहस्थजीवनं यापयित्वा कर्तव्यं निर्वत्य वानप्रस्थः भवेत्। तदनु अन्तिमाश्रमे प्रविश्य परि-व्रजकः भवेत् अथवा विरागी भूत्वा जीवनं यापयेत्। अन्यधर्मसूत्रग्रन्थेषु आश्रमाणां विवरणं दत्तमस्ति। आश्रमाणां परम्परा मानवानां व्यक्तिगतकर्तव्यानां पालनाय एव। यथा आधुनिककाले मानवस्य व्यक्तिगतरुचि-सामर्थ्य-जीवनोपार्जनादिविद्याः अधिगच्छन्ति तथैव प्राचीने कालेऽपि मानवस्य शारीरकावस्थानुगुणं वर्णव्यवस्था निर्दिष्टा। अतः बाल्यावस्था-युवावस्था-प्रौढावस्था-वृद्धावस्थानां दृष्ट्या अर्थात् वयोदृष्ट्या च आश्रमव्यवस्थाः परिकल्पिताः। बाल्यावस्थायां बालकस्य सर्वाङ्गीणविकासार्थं शिक्षा प्रदेया। तेन समाजे बालकस्य उत्तमस्थानं भवति, अतः ब्रह्मचारी ब्रह्मचर्याश्रमं गच्छेत्। युवावस्थायां मानवस्य विवाहः करणीयः यतः पुरुषार्थेषु कामः एकः। अतः उत्तमसन्तानार्थं गृहस्थाश्रमं स्वीकरणीयम्। बाल्यावस्थायाम् आर्जितशिक्षया गृहस्थाश्रमे धनोपार्जनं क्रियते जीवनं व्याप्यते च। प्रौढावस्थायाः अनन्तरं मानवस्य शक्तिः ह्रासं गच्छति। अतः वानप्रस्थी भूत्वा ज्ञानं, शान्तिश्च समुपार्जनीया। एवञ्च वृद्धावस्थायां मृत्युप्राप्तिभयमनुभूयते। अतः सर्वविधविषयेषु विरागी भूत्वा सन्यासी भवेदिति अथवा विरागी भूत्वा भिक्षाटनं कुर्यादिति इत्येतैः कारणैः आश्रमव्यवस्था परिकल्पिता प्राचीनभारतीयवाङ्मये।

**आवासव्यवस्था**– भारतीयप्राचीनाधिगमप्रणाल्याम् इदं तत्त्वमपि अधिगमे परोक्षप्रभावजनकं भवति। आवास-व्यवस्था इत्येकं परिपालनात्मकतत्त्वम् अधिगमे प्रभावमजनयत्। यदि निवस्तुं भोक्तुं च उत्तमव्यवस्था न भवति तर्हि छात्राः सम्यक् अध्ययनं कर्तुं न प्रभवन्ति स्म। अतः ऋषयः, कुलपतयः च प्राचीनाधिगमप्रणाल्यां छात्राणां कृते वासव्यवस्थामकल्पयन्।

उपनयनसंस्कारसंस्कृतो भूत्वा शिष्यः आचार्यस्य रक्षणे निवसति स्म। तत्र वक्तुं भोक्तुं पातुम् अध्येतुं च सर्वविधव्यवस्थां कर्तुं राजकीयसहायता अपेक्ष्यते स्म। जनेभ्यः धन-सहायता, छात्रेभ्यः गुरुदक्षिणा च स्वीक्रियते स्म। शिक्षाशुल्कम्, उपाहाराः, पारितोषिकम्, विद्यालयेभ्यः भूमिः एवं पशून् च दानत्वेन स्वीक्रियते स्म।

महाभारते एवं प्रतिपादितं वर्तते यत् राज्ञः कर्तव्यानि बहूनि सन्ति। तान्यथा-शिक्षायाः प्रोत्साहनम् एवम् अध्येतृभ्यः वस्त्रदानम् एवं ब्रह्मणच्छात्रेभ्यः छात्रवृत्तिप्रदानं च राज्ञः परम- कर्तव्यमिति। याज्ञवल्क्येन राज्ञः परमकर्तव्यम् इत्थं न्यरूपि। तद्यथा यत् ब्रह्मणेभ्यः समुचितावासस्य निर्माणप्रदानम्। अतिरिक्तशिक्षामधिगन्तुं समुचितव्यवस्थाप्रधानं च कर्तव्यमिति। शुक्रनीतेरनुसारं राज्ञाम् एकः आदेशः वर्तते यत् सेवकानां वेतनार्थिनां नियुक्तिः विशेषक्षेत्रेषु करणीया इति। दानं, सम्माननं, छात्राणां संरक्षणं, छात्रवृत्तिप्रदानं च राज्ञः कर्तव्यानि।

भारतीयप्राचीनकाले तक्षशिला-वल्लभी-नलन्दा इत्यादि विश्वविद्यालयेषु राजकीयानुदानेन व्यवस्था कृता। एवञ्च पल्लवनरेशनृपतुङ्गवर्मादिवत् केचन ग्रामान् स्वीकृत्य सर्वविधव्यवस्थां च अकुर्वन्। विद्यायाः विकासाय तत्र प्रोत्साहनं कर्तुं राजभिः गोष्ठ्यः चाल्यन्ते स्म। यथा वासुदेव-शातवाहन-शूद्रक-साहसाङ्कादि राजानः एतादृशगोष्ठीनां सञ्चालनाय समृद्धं धनं दीयते स्म।

एवञ्च प्राचीनकाले आश्रमनिर्वहणाय गुरुदक्षिणा स्वीकरणम् एकः उपायः। यदा छात्राः सम्यक् विद्यामधीत्य गृहागमनसमये गुरुणा वाञ्छित धन-वस्तुदानं करणीयमिति निमयो वर्तते। मनुमते शिष्यः तस्य सामर्थ्यानुसारं भूमिः - स्वर्णं - गावः - अश्वः - छत्र - आसन - धान्य - शाकानि, वस्त्रादि दानेन गुरुः प्रसन्नो भवति स्म। एवं याज्ञवल्क्यः अपि तेषां शिष्येभ्यः सर्वविधवस्तूनि स्वीकरोति स्म।

एवं भिन्न विधिभिः, मार्गैः च धत्तैः धन-वस्तु-भूमि-वस्त्र-धान्य-गो-भूम्यादिभिः नैक राजभिः दत्तसौकर्यादिभिः प्राचीनकाले छात्रेभ्यः उत्तमावासव्यवस्था प्रकल्पिता गुरुकुलेषु। तद्वारा छात्राः निराटङ्केन सर्वविधसौकर्यैः प्रसन्नतया च विद्यामधिगच्छन्ति स्म।

वर्तमानकालेऽपि ईदृशव्यवस्था एव दृश्यते। यदि उत्तमव्यवस्था न भवति तर्हि छात्रस्य असौविध्यं जायते। तेन छात्राधिगमस्य अवरोधः जायते।

**दिनचर्या** – दिने आचरणीयानि यानि कार्याणि भवन्ति तेषां समुदायः दिनचर्या इत्युच्यते। दिने आचरणीयानि यानि कार्याणि सन्ति तानि तत् तत् समये एव आचरणीयानि भवन्ति। आधुनिका- धिगमप्रणाल्यां छात्राधिगमे दिनचर्यायाः प्रामुख्यं दत्तम्। यथा उषोदयादारभ्य सायं पर्यन्तं पाठशालायां छात्राः भिन्नपाठ्यविषयाः समयसारिण्यनुगुणमेव अध्ययनं कुर्वन्ति। एकैकः पाठ्यविषयः एकस्यां होरायाम् अध्यापयन्ति, अध्ययनं कुर्वन्ति च। तदर्थं काचित् दिनचर्या रचिता भवति पाठशाला प्रधानाध्यापकेन। परन्तु अर्वाचीनाधिगमप्रणाल्यामपेक्षया प्राचीनाधिगमप्रणाल्यां दिनचर्यायाः प्रभावः महान् अवर्तत छात्राधिगमे।

प्राचीनकाले छात्राः गुरुकुले ब्रह्मीमूहूर्त्ते एव उत्तिष्ठन्ति स्म। तादृशाः उषर्बुधाः१७९ इत्याहूयन्ते स्म। तथैव ब्रह्मीमुहूर्त एव अध्ययनाय समीचीनसमय इति कथ्यते स्म। अतः छात्रः प्रातःकाले सन्ध्यावन्दनादिनित्यकर्मभ्यः निवृत्तस्सन् अध्ययनायोपविशति स्म। मध्याह्ने भोजनानन्तरं पुनः तदीयाध्ययनं प्रचलति स्म। रात्रावपि छात्रेषु अध्ययनप्रतियोगिता प्रचलन्ती आसीत्। सर्वेषामध्ययनकाले एकः कथं वा शयीत इत्यादीन्युदाहरणानि छात्राणामध्ययनविषयिकामहमिकां द्योतयन्ति। सामान्यतया प्रदोषे निशायामध्ययनं वर्जनीयमासीत्। वेदाध्ययनमपि अस्मिन्नेव काले वर्जनीयमासीत्। अतः निशायां प्रदोषे चाध्येतारश्छात्राः नैशिकाः नैशाः प्रादोषिकाः प्रादोषा इत्युच्यन्ते स्म। प्राचीनकाले दिनचर्यायां मानसिकी शारीरकी च शुद्धिः छात्रेण सम्पादनीया। तत्र मनस एव अभ्यर्हितत्त्वम्। अन्यथा अमनस्केभ्यः विद्यादानं निष्फलं भवेत्। आधुनिकाधिगमप्रणाल्याम् एतद्विरुद्धम् आदिश्यते क्रियते च। परन्तु प्राचीनकाले नित्यदिनचर्या एवं निर्दिष्टा। यथा - छात्राः ब्रह्ममुहूर्ते उत्थाय स्नात्वा शुचिना देवेभ्यः पितृभ्यः च तर्पणादिकं कृत्वा देवताभ्यर्चनं च कुर्वन्ति स्म। एवं छात्रैः मधुमांसगन्धमाल्यादिरसान् त्यजेयुः। तथा स्त्रीणां दूरे एव स्थातव्यम्। कस्यापि हिंसा न कार्या। काम-क्रोध-लोभादि नृत्य-गीत-वाद्यादिविषयेभ्यः दूरे भूत्वा श्रद्धया छात्राः भक्त्या च नित्यं तत्तत्समये दिनचर्यानुगुणं नित्यमध्ययनं कुर्युः। एषु आद्येन निबन्धात्मकविधिः

निर्दिष्टः । अनेन उभयविधां सम्पादयितुं शक्यम्। तेन छात्रेषु यथा स्किन्नर्, पावलोव् महोदयैः निबन्धनसिद्धान्तेषु निरूपिताधिगमः अनया निबन्धात्मकदिनचर्यया अपि प्रभावपूर्णाधिगमः अर्थात् व्यवहारपरिवर्तनं साध्यते स्म। अतः प्राचीनाधिगमप्रणाल्यां दिनचर्यायाः महत्त्वमधिकमासीदिति।

**कुलपतिः** – अधिगमः तदा एव प्रभावपूर्णः भवति यदा सर्वविधसौकर्याणि उपकरणानि समृद्धाः भवन्ति। अर्थात् प्रशासनविभागपक्षतः सर्वविधसौकर्याणि लभ्यन्ते, अध्यापकः अध्यापयन्ति छात्राः सम्यक् अध्ययनं कुर्वन्ति च। अतः प्राचीनाधिगमप्रणाल्यां चिन्तितं यत् गुरुकुलाश्रमं पालयितुम् एकः कुलपतिरपि अपेक्षते इति। भारतीयप्राचीनाधिगमप्रणाल्यां कुलपतिः इति शब्दः उल्लिखितः अस्ति। शिक्षासंस्थाभ्यः, गुरुकुलाश्रमः अथवा तपोवनमिति च नामोल्लिखितः। अनेके आश्रमाः एकत्र समूहरूपेण विकसिताः भवन्ति स्म। स एव शिक्षाकेन्द्रः इत्याहूयते। यस्मिन् शिक्षाकेन्द्रे अनेके विभागाः वर्तन्ते, विविधविषयाध्यापनम् अथवा शिक्षा च विधीयते स्म तत्र आचार्याः एकत्रिताः भवन्ति स्म। यथा नैमिशारण्ये विविधविषयान् अध्यापयितुं विद्यालयरूपः आश्रमः स्थापितः। एवमेव हिमालयसमीपस्थ मालिनीनद्याः तटे विशालाश्रमः स्थापितः। एतादृशाश्रमेषु एकः सर्वोन्नतश्रेष्ठोत्तमः भवति स्म। तं कुलपति इति आहूयन्ते स्म।

कुलपतिः सर्वविधविषयेषु समर्थः स्यात्। यश्च आश्रमे स्थित्वा अर्थात् छात्रेभ्यः अध्ययनाय-भोजनाय-वस्त्र-निवासादि सर्वविधसौकर्याणि निश्शुल्कं कल्पयितुं समर्थः स कुलपतिरिति कथ्यते स्म। तथैव भारतीयप्राचीनशास्त्रानुसारं स एव कुलपतिः भवितुमर्हति । यः दशसहस्राच्छात्रेभ्यः भोजननिवासादि सर्वविधव्यवस्थां कृत्वा अध्ययनमध्यापनं कर्तुं व्यवस्थां कल्पयति तं कुलपतिरिति कथ्यते। प्राचीनग्रन्थेषु अनेके कुलपतयः दृश्यन्ते। यथा उपरि अस्माभिः चर्चितमेव। वसिष्ठः - भारद्वाजः - विश्वामित्रः - वाल्मीकिः - कण्वः - शौनकादि मुनयः कुलपतिनाम्ना प्रसिद्धाः। आश्रमव्यवस्थापनाय बहुधनमपेक्ष्यते स्म। तदर्थं कुलपतिः भौतिकधनसम्पत्तिम् एवं लौकिकवैभवं दातुं समर्थः भवति स्म। ईदृशकारणेन एव दशसहस्रच्छात्रेभ्यः भरण-पोषण-अध्यापन-प्रबन्धकार्यं कर्तुं समर्थः इति कथितम्। एवम् आगतेभ्यः अतिथिभ्यः एवं राजभ्यः च सत्कारं कर्तुं च सक्षमः स भवति स्म। यथा रामायणेऽपि भारद्वाजः सैन्येन सह आगतस्य भरतस्य यथायोग्यं सत्कारमकरोत्। बृहदारण्यकोपनिषदि अपि आचार्य कुलपतिः आरुणिः सम्पत्तेः विषये वर्णयामास। अस्माकं समीपे स्वर्ण - गावः - अश्वाः - दासाः - कम्बलाः - वस्त्रादयः विद्यालयव्यवस्थायै पर्याप्ताः सन्तीति। कुलपतेः समीपे राजकीयेभ्यः अनुदानेभ्यः एवं छात्रेभ्यः प्राप्ता गुरुदक्षिणा इत्यादिकं सर्वमपि एकत्रितं भवति स्म। यथा शिष्यः कौत्सः तस्य गुरोः कृते अयोध्यायाः महाराजात् समृद्धधनं स्वीकृत्य गुरुदक्षिणरूपेण अददात्। ईदृशधनेन कुलपतिः प्रशासनव्यवस्थां प्रचालयति स्म।

एवं प्राचीनकाले आश्रमेषु कुलपतयः सर्वविधोपकरणानि दत्वा छात्राध्ययने, अध्यापने च अधिगमे व्यवस्थां कुर्वन्तः आसन्। अतः अधिगमे सर्वदा प्रशासनस्य प्रभावः भवत्येव।

**उपसंहारः** :- इत्येवं भारतीयसंस्कृतवाङ्मये शिक्षणव्यवस्था उल्लिखिता वर्तते। न केवलं शिक्षणव्यवस्थाया: विषये अपि च गुरुः, शिष्यः, शिक्षणपद्धतिः, शिक्षा इत्यादि विषयेषु तत्तत् सन्दर्भेषु तत्वानि प्रोक्तानि सन्ति।

**सन्दर्भग्रन्थसूची :-**


1. आपस्तम्बगृह्यसूत्रम् - लक्ष्मीनरसिंहाचार्यः, गायत्री प्रकाशनम्, हैदराबाद्।
2. आपस्तम्बधर्मसूत्रम् - श्री हरिदत्तमिश्रः, चौखम्भा संस्कृत संस्थान, वारणासि,१९९९।
3. कौटिल्यमर्थशास्त्रम् - पुल्लेल श्रीरामचन्द्रुडु, श्रीजयलक्ष्मी पब्लिकेशन्स्,हैदराबाद्।
4. भारतीय संस्कृति - डा.प्रीति प्रभा गोयल, राजस्थानी ग्रन्थागार, जोधपुर्।
5. वैदिकशिक्षापद्धतिः - डा.भाष्यकरमिश्रः, महर्षिसान्दीपनि राष्ट्रियवेदविद्याप्रतिष्ठानम्, उज्ययिनि, २००३।
6. वेदों में राजनीतिशास्त्र –डा. कपिलदेव द्विवेदी –विश्वभारती अनुसन्धान परिषद् -ज्ञानपुर।
7. वर्थमानभारतदेशमुलो विद्या –तेलुगु अकाडमी- अन्ध्रप्रदेशः- हैदराबाद् -२००१३।